## (इष्णुच्प्रत्ययः एकमवलोकनम् ।)

## 9.प्रभविष्णुः ।

*(डा. वि. आर्. मनोज्, व्याख्याता, श्री चन्द्रशेखरेन्द्रसरस्वतीविश्वमहाविद्यालयः, काञ्ची ।)*

उमामिच्छन् भगवता परमेश्वरेण प्रेषिताः सप्तर्षयः तत्पितुः हिमवतः सन्निधिं प्रापुः। तथा चोमाप्रदानवर्णनवेलायां कालिदासः –

"तथापि तावत्कस्मिँश्चिदाज्ञां मे दातुमर्हथ।
विनियोगप्रसादा हि किंकराः **प्रभविष्णुषु**।।" इति। (कुमारसम्भवम्.6.62.)

हिमवान् सप्तर्षीनुवाच। भवतां निस्पृहत्वेऽपि कस्मिँश्चित्कर्मणि इदं कुर्वित्याज्ञां मे दातुमर्हथ। यतः किंकराः **प्रभविष्णुषु** स्वस्वामिषु कर्मणि प्रेषणमेव अनुग्रहं मन्वते। प्रभवन्तीति **प्रभविष्णुः**। अत्र "भुवश्च" (पा.सू.3.2.138) इतीष्णुच्प्रत्ययः। भाषायामयं प्रयोगः। वस्तुतः "णेश्छन्दसि" (पा.सू.3.2.137) इत्यस्मात्पूर्वसूत्रात् छन्दसि इत्यनुवर्तनात् 'भू' धातोः छन्दस्येवेष्णुच्प्रत्ययेन भवितव्यम्। तथापि 'छन्दोवत्कवयो वदन्ति' इत्युक्तरीत्यात्र समाधेयम्।

एवं "भुवश्च" (पा.सू.3.2.138) इति सूत्रे "चकारोऽनुक्तसमुच्चयार्थः" इति काशिकावृत्तिः। सूत्रे परिगणितातिरिक्तानामपि सति प्रयोगसम्भवे योजनायेति तत्तात्पर्यम्। अत एव '**भ्राजिष्णु**ना लोहितचन्दनेन' इति तत्रैव काशिकावृत्तावुदाहृतम्।

रघुवंशस्य षोडशेऽध्याये ग्रीष्मर्तौ पुरसुन्दरीसहचरितस्य सरय्वां विहर्तुमिच्छोः श्रीरामसुतस्य कुशस्य वर्णनाप्रसङ्गे –

"ततो नृपेणानुगताः स्त्रियस्ताः **भ्राजिष्णु**ना सातिशयं विरेजुः।
प्रागेव मुक्ता नयनाभिरामाः प्राप्येन्द्रनीलं किमुतोन्मयूखम्।।" इति। (रघुवंशः.16.69.)

**भ्राजिष्णु**र्नाम रोचिष्णुरित्यर्थः। 'विभ्राड् भ्राजिष्णुरोचिष्णू' इत्यमरः। तथा चात्र भ्राजिष्णुना नृपेणानुगताः स्त्रियं सातिशयं विरेजुः। कथमिव ? यथा प्रागेव (इन्द्रनीलयोगात्पूर्वमेव) नयनाभिरामाः मुक्ताः = मणयः उन्मयूखमत्यन्तशोभि इन्द्रनीलं प्राप्य नितरां शोभन्ते, तद्वदिति। मनोभिरामास्तास्त्रिय इति किमु वक्तव्यमिति भावः। एवं –

'......दिवं **वर्तिष्णवो**ऽभितः। **अलङ्करिष्णवो** भान्तः ......।।" इत्यादि भट्टिप्रयोगाः (भट्टिकाव्यम्.7.3.)। अत्र **वर्तिष्णव** इति 'वृतु वर्तने' (भ्वा.745) इत्यस्माद्धातोरिष्णुच्प्रत्यये सिद्धम्। वर्तनशील इत्यर्थः। 'वर्तिष्णुर्वर्तनः समौ' इत्यमरः। अलम्पूर्वकात् 'डुकृञ् करणे' (तना.1473) इत्यस्मादिष्णुचि **अलङ्करिष्णुः** इति रूपम्। 'अलङ्करिष्णुस्तु मण्डनः' इत्यमरः।

एवं "तर्पणं **प्रजनिष्णू**नां सस्यानाममलं पयः" इति (भट्टिकाव्यम्.7.2.)। **प्रजनिष्णू**नां = प्रादुर्भावकानां सस्यानां तृप्तिकरं पयो ववृषुर्मेघाः इति सारः। 'प्र'पूर्वकात् 'जनी प्रादुर्भावे' (दिवा.1149) इत्यस्मादिष्णुच्। तथा उत्पूर्वकात् 'डुपचष् पाके' (भ्वा.966) इत्यस्मात् इष्णुच्प्रत्यये **उत्पचिष्णुः** इति।

आस्तां तावदिदानीं सूत्रोक्तान् इष्णुच्प्रत्ययप्रकृतिकान् धातून् तद्रूपाँश्चाकलयामः।

| क्र.सं. | धातुः | गणसंख्या | रूपम् |
|---|---|---|---|
| 1. | 'अलं + डुकृञ् करणे' | (तना.1473) | अलङ्करिष्णुः। |
| 2. | 'निर्+आङ्+डुकृञ् करणे' | (तना.1473) | निराकरिष्णुः। |
| 3. | 'प्र + जनी प्रादुर्भावे' | (दिवा.1149) | प्रजनिष्णुः। |
| 4. | 'उत् + डुपचष् पाके' | (भ्वा.966) | उत्पचिष्णुः। |
| 5. | 'उत् + पत्लृ गतौ' | (भ्वा.845) | उत्पतिष्णुः। |
| 6. | 'उत् + मदी हर्षे' | (भ्वा.815) | उन्मदिष्णुः। |
| 7. | 'रुच दीप्तावभिप्रीतौ च' | (भ्वा.745) | रोचिष्णुः। |
| 8. | 'अप + त्रपूष् लज्जायाम्' | (भ्वा.374) | अपत्रपिष्णुः। |
| 9. | 'वृतु वर्तने' | (भ्वा.745) | वर्तिष्णुः। |
| 10. | 'वृधु वृद्धौ' | (भ्वा.759) | वर्धिष्णुः। |

| | | | |
|---|---|---|---|
| **11.** | ‘षह मर्षणे’ | (भ्वा.852) | सहिष्णुः। |
| **12.** | ‘चर गत्यर्थः’ | (भ्वा.569) | चरिष्णुः। |
| **13.** | ‘भू सत्तायाम्’ | (भ्वा.1) | भविष्णुः। |

*******